# ॥ दुर्गाचन्द्रकलास्तुतिः ॥

वेधोहरीश्वरस्तुत्यां विहर्त्रीं विन्ध्यभूधरे।
हरप्राणेश्वरीं वन्दे हन्त्रीं विबुधविद्विषाम्॥ १॥

अभ्यर्थनेन सरसीरुहसम्भवस्य
त्यक्त्वोदिता भगवदक्षिपिधानलीलाम्।
विश्वेश्वरी विपदपाकरणे पुरस्तात्
माता ममास्तु मधुकैटभयोर्निहन्त्री॥ २॥

प्राङ्निर्जरेषु निहितैर्निजशक्तिलेशैः
एकीभवद्भिरुदिताऽखिललोकगुप्त्यै ।
सम्पन्नशस्त्रनिकरा च तदायुधस्थैः
माता ममास्तु महिषान्तकरी पुरस्तात्॥ ३॥

प्रालेयशैलतनयातनुकान्तिसम्पत्-
कोशोदिता कुवलयच्छविचारुदेहा।
नारायणी नमदभीप्सितकल्पवल्ली
सुप्रीतिमावहतु शुम्भनिशुम्भहन्त्री॥ ४॥

विश्वेश्वरीति महिषान्तकरीति यस्याः
नारायणीत्यपि च नामभिरङ्कितानि।
सूक्तानि पङ्कजभुवा च सुरर्षिभिश्च
दृष्टानि पावकमुखैश्च शिवां भजे ताम्॥ ५॥

उत्पत्तिदैत्यहननस्तवनात्मकानि
संरक्षकाण्यखिलभूतहिताय यस्याः।
सूक्तान्यशेषनिगमान्तविदः पठन्ति
तां विश्वमातरमजस्रमभिष्टवीमि॥ ६॥

ये वैप्रचित्तपुनरुत्थितशुम्भमुख्यैः
दुर्भिक्षघोरसमयेन च कारितासु।
आविष्कृतास्त्रिजगदार्तिषु रूपभेदाः
तैरम्बिका समभिरक्षतु मां विपद्भ्यः॥ ७॥

सूक्तं यदीयमरविन्दभवादिदृष्टम्
आवर्त्य देव्यनुपदं सुरथः समाधिः।
द्वावप्यवापतुरभीष्टमनन्यलभ्यं
तामादिदेवतरुणीं प्रणमामि मूर्ध्ना॥ ८॥

माहिष्मतीतनुभवं च रुरुं च हन्तुम्
आविष्कृतैर्निजरसादवतारभेदैः ।
अष्टादशाहतनवाहतकोटिसङ्घैः
अम्बा सदा समभिरक्षतु मां विपद्भ्यः ॥ ९ ॥

एतच्चरित्रमखिलं लिखितं हि यस्याः
सम्पूजितं सदन एव निवेशितं वा ।
दुर्गं च तारयति दुस्तरमप्यशेषं
श्रेयः प्रयच्छति च सर्वमुमां भजे ताम् ॥ १० ॥

यत्पूजनस्तुतिनमस्कृतिभिर्भवन्ति
प्रीताः पितामहरमेशहरास्त्रयोऽपि ।
तेषामपि स्वकगुणैर्ददती वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये ॥ ११ ॥

कान्तारमध्यदृढलग्नतयाऽवसन्नाः
मग्नाश्च वारिधिजले रिपुभिश्च रुद्धाः ।
यस्याः प्रपद्य चरणौ विपदस्तरन्ति
सा मे सदाऽस्तु हृदि सर्वजगत्सवित्री ॥ १२ ॥

बन्धे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे य महोपतापे ।
यत्पादपूजनमिह प्रतिकारमाहुः
सा मे समस्तजननी शरणं भवानी ॥ १३ ॥

बाणासुरप्रहितपन्नगबन्धमोक्षः
तद् बाहुदर्पदलनादुषया च योगः ।
प्राद्युम्निना द्रुतमलभ्यत यत्प्रसादात्
सा मे शिवा सकलमप्यशुभं क्षिणोतु ॥ १४ ॥

पापः पुलस्त्यतनयः पुनरुत्थितो माम्
अद्यापि हर्तुमयमागत इत्युदीतम् ।
यत्सेवनेन भयमिन्दिरयाऽवधूतं
तामादिदेवतरुणीं शरणं गतोऽस्मि ॥ १५ ॥

यद् ध्यानजं सुखमवाप्यमनन्तपुण्यैः
साक्षात् तमच्युतपरिग्रहमाश्ववापुः ।
गोपाङ्गनाः किल यदर्चनपुण्यमात्राः
सा मे सदा भगवती भवतु प्रसन्ना ॥ १६ ॥

रात्रिं प्रपद्य इति मन्त्रविदः प्रपन्नान्
उद्बोध्य मृत्यवधिमन्यफलैः प्रलोभ्य।
बुद्ध्वा च तद्विमुखतां प्रतनं नयन्तीम्
आकाशमादिजननीं जगतां भजे ताम्॥ १७॥

देशकालेषु दुष्टेषु दुर्गाचन्द्रकलास्तुतिः।
सन्ध्ययोरनुसन्धेया सर्वापद्विनिवृत्तये॥ १८॥

॥ इति श्रीमदप्पयदीक्षितविरचिता श्रीदुर्गाचन्द्रकलास्तुतिः सम्पूर्णा॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Durga_Chandra_Kala_Stuti.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits